This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

॥पंचीकरणवार्तिकप्रारंभः॥

१

श्रीगणेशायनमः॥ अथवार्तिकप्रारंभः॥ ॐकारः सर्ववेदा
नांसारस्तत्वप्रकाशकः॥ तेनचित्तसमाधानंमुमुक्षूणांप्रका
श्यते॥१॥ आसीदेकंपरंब्रह्मनित्यमुक्तमविक्रियं॥ तत्स्वमाया
समावेशाद्बीजमव्याकृतात्मकं॥२॥ तस्मादाकाशमुत्पन्नंशब्दत
न्मात्ररूपकं॥ स्पर्शात्मकस्ततोवायुस्तेजोरूपात्मकंततः॥३॥
आपोरसात्मिकास्तस्मात्ताभ्योगंधात्मिकामही॥ शब्दैकगुण
माकाशंशब्दस्पर्शगुणोमरुत्॥४॥ शब्दस्पर्शरूपगुणैस्त्रिगु
णंतेजउच्यते॥ शब्दस्पर्शरूपरसैर्गुणैरापश्चतुर्गुणाः॥५॥श

Acc. No. ~~2667~~ M-1620
Title - पञ्चीकरणवार्तिक
Author - सुरेश्वराचार्य
Date - ?
Subject - वेदान्त
folio - 7
Xerox - 7.

KKSU LIBRARY RAMTEK 441 106 M-1620 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्व स्पर्शरूपक्रुंरसगंधैः पंचगुणा मही ॥ तेभ्यः समभवत्सूत्रं
लिंगं सर्वात्मकं महत् ॥ ६ ॥ ततः स्थूलानि भूतानि पंचैतेभ्यो
विराड्भवत् ॥ पंचीकृतानि भूतानि स्थूलानीत्युच्यते बुधैः ॥ ७ ॥
पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्विधा ॥ एकैकं भागमादा
य चतुर्धा विभजेत्सुधीः ॥ ८ ॥ एकैकं भागमेकस्मिन् भूते संवे
शयेत्क्रमात् ॥ ततश्चाकाशभूतस्य भागाः पंच भवंति हि ॥ ९ ॥
वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमाविशत् ॥ पंचीकरणमे
तत्स्यादित्याहुस्तत्त्ववेदिनः ॥ १० ॥ पंचीकृतानि भूतानि तत्कार्यं

2

च विराड् भवेत् ॥ स्थूलं शरीरमेतत्स्याद् शरीरस्य चात्मनः ॥ ११ ॥
अधिदैवतमध्यात्ममधिभूतमिति त्रिधा ॥ एकं ब्रह्म विभाग
न भ्रमाद्भाति निरत्ययः ॥ १२ ॥ इंद्रियैरर्थविज्ञानं देवतानुग्रहा
न्वितैः ॥ शब्दादिविषयज्ञानं तज्जागरितमुच्यते ॥ १३ ॥ श्रोत्र
मध्यात्ममित्युक्तं श्रोतव्यं शब्दलक्षणं ॥ अधिभूतं तदित्यु
क्तं दिशस्तत्राधिदैवतं ॥ १४ ॥ त्वगध्यात्ममिति प्रोक्तं स्प
ष्टव्यं स्पर्शलक्षणं ॥ अधिभूतं तदित्युक्तं वायुस्तत्राधि
दैवतं ॥ १५ ॥ चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं रूपलक्षणं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधिभूतं तदित्युक्तमादित्यो त्राधिदैवतं ॥१६॥ जिह्वाध्या
त्मं चास्वाद्यमधिभूतं रसात्मकं ॥ वरुणो देवतातत्र जिह्वाया
मधिदैवतं ॥१७॥ घ्राणमध्यात्ममित्युक्तं घ्रातव्यं गंधलक्ष
णं ॥ अधिभूतं तदित्युक्तं पृथिव्यात्राधिदैवतं ॥१८॥ वाग
ध्यात्ममिति प्रोक्तं वक्तव्यं तत्र यद्भवेत् ॥ अधिभूतं तदित्यु
क्तमग्निस्तत्राधिदैवतं ॥१९॥ हस्तावध्यात्ममित्युक्तमादा
तव्यं च यद्भवेत् ॥ अधिभूतं तदित्युक्तमिंद्रस्तत्राधिदैवतं
॥२०॥ पादावध्यात्ममित्युक्तं गंतव्यं तत्र यद्भवेत् अधिभूतं
तदित्युक्तं विष्णुस्तत्राधिदैवतं ॥२१॥ पायुरिंद्रियमध्यात्मं

३

विसर्गस्तत्र यो भवेत् ॥ अधिभूतं तदित्युक्तं मृत्युस्तत्राधिदै
वतं ॥२२॥ उपस्थेंद्रियमध्यात्मं स्त्रियाद्यानंदकारणं ॥ अधि
भूतं तदित्युक्तमधिदैवं प्रजापतिः ॥२३॥ मनो ध्यात्ममिति
प्रोक्तं मंतव्यं तत्र यद्भवेत् ॥ अधिभूतं तदित्युक्तं चंद्रस्तत्रा
धिदैवतं ॥२४॥ बुद्धिरध्यात्ममित्युक्तं बोधव्यं तत्र यद्भवेत् ॥
अधिभूतं तदित्युक्तमधिदैवं बृहस्पतिः ॥२५॥ अहंकार
स्तथाध्यात्ममहंकर्तव्यमेव च ॥ अधिभूतं तदित्युक्तं रुद्र
स्तत्राधिदैवतं ॥२६॥ चित्तमध्यात्ममित्युक्तं चेतयितव्यं तत्र य
द्भवेत् ॥ अधिभूतं तदित्युक्तं क्षेत्रज्ञो त्राधिदैवतं ॥२७॥

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमोध्यात्मेमिनिप्रोक्तं विकारस्तत्रयो भवेत् ॥ अधिभू
तंतदिस्युक्तमीश्वरोत्रा धिदैवतं ॥२८॥ बाह्यांतःकरणैरेवं
देवतानुग्रहान्वितैः ॥ स्वंस्वंचविषयंज्ञानंतज्जागरितमुच्य
ते ॥२९॥ यद्यंजागरितावस्था शरीरंकारणाश्रयं ॥ यस्तयोर
भिमानीस्यात् विश्वइत्यभिधीयते ॥३०॥ विश्वंवैराजरूपे
णपश्येद्भेदनिवृत्तये ॥ ज्ञानेंद्रियाणिपंचैवपंचकर्मेंद्रि
याणिच ॥३१॥ श्रोत्रत्वक्नयनेघ्राणजिह्वादींद्रियपंच
कं ॥ वाक्पाणिपादपायूपस्थः कर्मेंद्रियपंचकं ॥३२॥ म
नोबुद्धिरहंकारश्चित्तंचेतिचतुष्टयं ॥ संकल्पारव्यं

४
मनोरूपंबुद्धिर्निश्चयरूपिणी ॥३३॥ अभिमानात्मकस्तद्व
दहंकारःप्रकीर्तितः ॥ अनुसंधानरूपंचचित्तमित्यभि
धीयते ॥३४॥ प्राणापानस्तथाव्यानउदानाख्यस्तथै
वच ॥ समानश्चेतिपंचैताःकीर्तिताःप्राणवृत्तयः ॥३५॥
स्थूलाख्यंबुद्धिनयोभूतसूक्ष्माणिपंचच ॥ अविद्या
कामकर्माणिलिंगपुर्यष्टकंविदुः ॥३६॥ एतत्सूक्ष्मश
रीरंस्यान्मायिकंप्रसगात्मनः ॥ कारणोपरमेनाम्नेस्वका
रोहशरीरवत् ॥३७॥ ग्राह्यग्राहककरूपेणस्फुरणंस्व
प्न उच्यते ॥ अभिमानीतयोर्यस्तुतैजसःपरिकीर्तितः ॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरण्यगर्भरूपेणतैजसं चिंतयेद्बुधः ॥ चैतन्याभासरवचितंश
रीरद्वयकारणं ॥ ३९ ॥ आत्माज्ञानेनतद्व्यक्तमव्याकृतमितीर्यते
॥ नसन्नासन्नसद्सद्भिन्नाभिन्ननचात्मनः ॥ ४० ॥ नसभागंन
निर्भागंनचाप्युभयरूपकं ॥ ब्रह्मात्मैकत्वविज्ञानहेयंमि
थ्यात्मकारणात् ॥ ४१ ॥ ज्ञानानामुपसंहारोबुद्धेः कारणा
तास्थितिः ॥ वटबीजेवटस्येवसुषुप्तिरभिधीयते ॥ ४२ ॥ अ
भिमानीतयोर्यस्तुप्राज्ञइत्यभिधीयते ॥ जगत्कारणरूपेण
प्राज्ञात्मानं विचिंतयेत् ॥ ४३ ॥ विश्वतैजससौषुप्तविराट्सूत्र
ात्मकारात्मभिः ॥ विभिन्नमिवसंमोहादेकंतत्वंचिदात्मकं ॥ ४४ ॥

५

विश्वादिकत्रयंयस्माद्विराजादित्रयात्मकं ॥ एकत्वेनैवसं
पश्येदन्याभावप्रसिद्धये ॥ ४५ ॥ ॐकारमात्रमखिलंवि
श्वप्राज्ञादिरूपणं ॥ वाच्यवाचकयोर्भेदाद्भेदेनानुपल
ब्धितः ॥ ४६ ॥ अकारमात्रेविश्वस्यादुकारस्तैजसस्मृतः ॥
प्राज्ञोमकारइत्येवपरिपश्येत्क्रमेणतु ॥ ४७ ॥ समाधि
कालात्प्रागेवंविचिंत्यातिप्रयत्नतः ॥ स्थूलसूक्ष्मक्र
मात्सर्वंचिदात्मनिविलापयेत् ॥ ४८ ॥ अकारंपुरुषंविश्व
मुकारेप्रविलापयेत् ॥ उकारंतैजसंसूक्ष्मंमकारेप्रविलाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत् ॥४९॥ मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत् ॥ चिदा
त्माहं नित्यबुद्धशुद्धमुक्तमदद्वयः ॥५०॥ परमानंदसंदोहवा
सुदेवोहमस्मीति ॥ ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विला
पयेत् ॥५१॥ चिदात्मनि विलीने च तच्चित्ते नैव चालयेत् ॥
पूर्णबोधात्मनासीत पूर्णाचलसमुद्रवत् ॥५२॥ एवं समा
हितो योगी श्रद्धाभक्तिसमन्वितः ॥ जितेंद्रियो जितक्रो
धः पश्येदात्मानमद्वयं ॥५३॥ आदिमध्यावसानेषु दुःखं सर्व
मिदं यतः ॥ तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा ॥५४॥
यः पश्येत्सर्वगं शांतमानंदात्मानमद्वयं ॥ न तेन किंचि

दातमंहातं अवावशिष्यते ॥५५॥ कृतकृत्यो भवेद्विद्वान्जी
वन्मुक्तो भवेत्सदा ॥ कदाचिद्व्यवहारे तु द्वैतं यद्यपि प
श्यति ॥५६॥ बोधात्मव्यतिरेकेण न पश्यति चिदन्वयात् ॥
किंतु पश्यति मिथ्यैव दिङ्मोहेंदुविभागवत् ॥५७॥ प्र
तिभासः शरीरस्य तदा प्रारब्धसंक्षयात् ॥ तस्य तावदेव चि
रमित्यादि श्रुतिरब्रवीत् ॥५८॥ प्रारब्धस्यानुवृत्तिस्तु मुक्त
स्याभासमात्रतः ॥ सर्वदा मुक्त एव स्यात् ज्ञानतः पुमान
सौ ॥५९॥ प्रारब्धभोगशेषस्य संक्षये तदनंतरं ॥ अविद्या
तिमिरातीतं सर्वाभासविवर्जितं ॥६०॥ आनंदममलं शुद्धम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोवाचामगोचरं ॥ वाच्यवाचकनिर्मुक्तं हेयोपादे
यवर्जितं ॥ ६१ ॥ प्रज्ञानघनमानंदं ब्रह्मैवंपदमश्नुते ॥ इ
मं प्रकरणं युक्त्या ज्ञातव्यं साधकोत्तमैः ॥ ६२ ॥ अमानि
त्वादिनियमैर्गुरुभक्तिप्रसादतः ॥ इमां विद्यां प्रयत्ने
न योगी संध्यास्तु सर्वदा ॥ ६३ ॥ समभ्यसेदिहामुत्र भो
गानासक्तधीः सुधीः ॥ रागद्वेषादिरहितैः स्वात्मानं चिं
तयेत्सदा ॥ ६४ ॥ इति श्रीमत्परमहंसपरिव्राजकाचा
र्यपूज्यपादशिष्य श्री सुरेश्वराचार्यविरचितं पंची
करणवार्तिकं संपूर्णं श्रीनारायणार्पणमस्तु ॥

KKSU LIBRARY
RAMTEK
441 106
M/620
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.10.20 11:58
,TRANSFERRED=2020/10/26 at 12:00:30
,PAGES=7
,TYPE=STD
,NAME=S0004544
,Book Name=M-1620-PASHCHIKARAN VARTIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection